द्यूते युद्धे विवादे च यात्रायां सम्मुखस्थितम्। राहुं विवर्ज्जयेत् यत्नाद्यदीच्छेत् कर्म्मणः फलम्”। एवं योगिन्याभिमुख्येऽपि गमनं न शस्तम् यथा “प्रतिपन्नवमी पूर्व्वे रामा रुद्राश्च पावके। शरस्त्रयोदशी याम्ये वेदा मासाश्च नैरृते। षष्ठी चतुर्द्दशी पश्चात् वायव्यां मुनिपूर्णिमे। द्वितीया दशमी यक्षे ऐशान्यामष्टमी कुहूः। योगिनी नवदस्रवाश्च शेषा वर्ज्या विशेषतः। दक्षसम्मुखयोगिन्यां गमनं नैव कारयेदिति” ज्यो०त०। पीयूषधारायान्तु “पृष्ठतोदक्षिणे वापि योगिनीगमने हिता। वामसम्मुखयोर्नैव वायुमेवं चिन्तयेत्” जयकल्पलतावाक्ये तन्मूलके मुहूर्त्त० चि०वाक्ये च “नवभूम्यः शिववह्नयोऽक्षविश्वेऽर्ककृताः शक्रास्तुरङ्गतिथ्यः। द्विदशामावसवश्च पूर्व्वतः स्युस्तिथयः सम्मुखवामगा न शस्ताः” वामगाया अशुभत्वमुक्तम्। अनयोर्व्यवस्था देशभेदेन। कालपाशयोराभिमुख्येन यानमपि न शस्तम् “कौवेरीतो वैपरीत्येन कालो वारेऽर्काद्ये सम्मुखे तस्य पाशः। यात्रायुद्धे सम्मुखे वर्ज्जनीयावेतौ रात्रौ व्यस्तसंज्ञौ विचिन्त्यौ” मुहू०। स्वररत्नसारे “रवावुत्तरतः कालः सोम्ये वायव्यभागके। भौमे तु पश्चिमे भागे बुधे नैरृतकोणके। जीवे च याम्यदिग्भागे भृगौ चाग्नेयकोणके। शनौ तु पूर्व्वदिग्भागे कालचक्रं प्रकीर्त्तितम्। पाशस्तत्सम्मुखदिशि” कालापेक्षया पञ्चमदिशि पाश इत्यर्थः यथा रवौ दक्षिणस्यां, सोमे आग्नेय्यां, भौमे पूर्व्वस्यां, बुधे ऐशान्यां, गुरावुत्तरस्यां, शुक्रे वायव्यां, शनौ पश्चिमायाम्। कालपाशयोराभिमुख्यं यात्रादौ निषिद्धं वामदक्षिणयोस्तु शुभाशुभफलकत्वं यथाह स्वरो० “दक्षिणस्तु शुभःकालः पाशोवामदिगाश्रयः। यात्रायां समरे श्रेष्ठस्ततोऽन्यत्र न शोभनः” “अन्यत्र सम्मुखपृष्ठभागयोः” पी०धा०। रात्रौ तु कालपाशयोर्विपर्य्यासेन स्थितेस्तदनुसारेणैव फलम्। पूर्व्वादिदिगभिमुखानि नक्षत्राणि। “पूर्व्वादिषु चतुर्द्दिक्षु सप्त सप्तानलर्क्षतः” मुहू० तेन कृत्तिकादीनि सप्त पूर्व्वदिङ्मुखानि। मघादीनि सप्त दक्षिणाभिमुखानि। अनुराधादीनि साभिजित्कानि सप्त पश्चिमाभिमुखानि। धनिष्ठादीनि भरण्यन्तादीनि सप्त उत्तराभिमुखानि। तैस्तैर्नक्षत्रैस्तत्तद्दिगभिमुखगृहकरणं तत्प्रवेशश्च शुभाय। “यद्दिग्द्वारं मन्दिरं तद्दिगृक्षैरुक्तर्क्षैः स्यात् सन्निवेशो न सर्व्वैः” वशि०। पूर्व्वादिदिगभिमुखा राशयो यथा। “पूर्व्वादिदिक्षु मेषाद्याः क्रमाद्दिग्द्वारराशयः।

दिग्द्वारराशयः सर्व्वे तद्दिग्यातुः शुभप्रदाः। तद्वर्गाश्च तदंशाश्च तद्दिग्यातुस्तथाविधाः” वशिष्ठः। “दिग्द्वारभे लग्नगते प्रशस्ता यात्रार्थदात्री जयकारिणी च। हानिं विनाशं रिपुतोभयञ्च कुर्य्यात् तथा दिक्प्रतिलोमलग्ने” इति मुहू०। शुक्राभिमुख्यं त्रिविधम् “उदयति दिशि यस्यां, याति गोलभ्रमाद्वा, विचरति च भचक्रे यत्र दिग्द्वारभेषु। त्रिविधमिह सितस्य प्रोच्यते सम्मुखत्वं मुनिभिरुदयएव त्यज्यते तत्र यत्नात्” श्रीपतिः। “उदेति यस्यां दिशि यत्र याति गोलभ्रमाद्वाथ ककुब्भचक्रे। त्रिधोच्यते सम्मुखएव शुक्रो यत्रोदितस्तां तु दिशं न यायात्” मुहू०। “शुक्रः यस्यां दिशि प्राच्यां प्रतीच्यां वा कालवशेनोदयं करोति तत्र गन्तुः पुंसः शुक्रः सम्मुखः अयमेकः प्रकारः। अथ गोलभ्रमात्उत्तरदक्षिणगोलभ्रमणवशेन यस्यां दिशि उत्तरस्यां दक्षिणस्यां वा याति तत्र गन्तुः शुक्रः सम्मुखः स्यादिति द्वितीयः प्रकारः। प्राच्यादिदिग्द्वारकृत्तिकादिगतिवशेन यद्दिङ्नक्षत्रे शुक्रश्चरति तत्र दिशि गन्तुः शुक्रः सम्मुखःस्यादिति तृतीयःप्रकारः। तत्रोदयशुक्रे दोषाधिक्यमिति” पी० धा०। अतएव वशिष्ठः “पश्चादभ्युदिते शुक्रे प्रतीचीं दक्षिणां दिशम्” इति उदयदिग्गतस्यैव शुक्रस्याभिमुख्ये यात्रादि न्यषेधत्। अत्रापवादः “बुधोऽनुकूलो यदि तत्र संचलन् रिपून जयेन्नैव जयः प्रतीन्दुजे” मुहू०। शुक्राभिमुख्यादिदोषमुक्त्वा। “एवं विधेऽप्यास्फुजिते च यायाद्बुधोयदि स्यादनुकूलवर्त्ती” श्रीपतिः। अनुकूलः पृष्ठदिक्संस्थ” इति पी०धा०। अपवादान्तरम् “नीचगोऽरिगृहस्थो वा वक्रगोवा पराजितः। यातुर्भङ्गप्रदः शुक्रः स्वोच्चस्थश्चेष्टनप्रदः” इति नारदः। प्रतिशुक्रादिदोषोन्नृणां प्रथमयात्रायां राज्ञां च विजययात्रायामेव यथाह रैभ्यः। “प्रतिशुक्रादिदोषोऽयं नूतने गमने नृणाम्। राज्ञां विजययात्रायां नान्यदा दोषमावहेत्” चन्द्रस्य नक्षत्रविशेषस्थितौ तदपवादः। “यावच्चन्द्रः पूषभात् कृत्तिकाद्ये पादे शुक्रोऽन्धो न दुष्टोऽग्रहदक्षे” मुहू०। “पौष्णादिवह्निभाद्यांघ्रिं यावत्तिष्ठति चन्द्रमाः। तावच्छुक्रो भवेदन्धः सम्मुखे गमनं हितम्” पराशरः। राज्ञां विजययात्रायां विशेषः। मध्ये मार्गं भार्गवास्तेऽपि राजा तावत्तिष्ठेत् सम्मुखत्वेऽपि तस्य” मुहू०। अत्यन्तापदि शान्तिं कृत्वा यायात्। शान्तिश्च पी०धा० यात्राप्रकरणे दर्शिता ततएव ज्ञेया।